कुलं दद्याच्छिवलोके महीयते। साम गायतश्चैतत् सामव्रतमिहोच्यते"।

सारस्वतपञ्चमीव्रतं पद्मपु॰ "सम्यक् पृष्टं त्वया राजन्! शृणु सारस्वतं व्रतम्। यस्य सङ्कीर्त्तनादेव तुष्यतीह सरस्वती। यो यद्भक्तः पुमान् कुर्य्यादेतद्व्रतमनुत्तमम्। तद्वासरादौ संपूज्य विप्रानेतत् समारभेत्। अथवादित्यवारेण ग्रहताराबलेन च। पायसम्भोजयित्वा तु कुर्य्याद् ब्राह्मणवाचनम्। शुक्लवस्त्राणि दद्याच्च सहिरण्यानि शक्तितः। गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः। एभिर्मन्त्रपदैः पश्चात् सर्वं कुर्य्यात् कृताञ्जलिः। एवं संपूज्य गायत्रीं वीणाक्षमणिधारिणीम्। शुक्लपक्षेऽक्षतैर्भक्त्या सकमण्डलुपुस्तकाम्। मौनव्रतेन भुञ्जीत सायं प्रातश्च धर्मवित्। पञ्चम्यां प्रतिपक्षे च पूजयित्वा सुवासिनीः। तस्यां तु तण्डुलप्रस्थं घृतपात्रेण संयुतम्। क्षीरं दद्यात् हिरण्यञ्च गायत्री प्रीयतामिति। सन्ध्ययोश्च तथा मौनमेतत् कुर्व्वन् समारभेत्। नान्तरा भोजनं कुर्य्याद् यावन्मासास्त्रयोदश। समाप्ते तु व्रते दद्यात् भाजनं शुभतण्डुलैः। पूर्णं सवस्त्रयुग्मन्तु गां सवत्सां सुशोभनाम्। विप्राय वेदविदुषे। वाचकायाथ पार्थिव! अनेन विधिना यस्तु कुर्य्यात् सारस्वतं व्रतम्। विद्यावान् धनयुक्तश्च रक्तकण्ठश्च जायते। सरस्वत्याः प्रसादेन व्यासवत् स कविर्भवेत्। नारी वा कुरुते या तु सापि तत्फलभागिनी"।

सारस्वतव्रतं पद्मपु॰ "सन्ध्यामौनं नरः कृत्वा समान्ते घृतकुम्भकम्। वस्त्रयुग्मं तिलान् घण्टां ब्राह्मणाय निवेदयेत्। लोकं सारस्वतं याति पुनरत्रैव जायते। एतत् सारस्वतं नाम रूपविद्याप्रदायकम्"।

सार्वभौमव्रतं वराहपु॰ "सार्वभौमव्रतं चान्यत् कथयामि समासतः। येन सम्यक्कृतेनाशु सार्वभौमो भवेन्नरः। कार्त्तिकस्य तु मासस्य दशमी शुक्लपक्षगा। तस्यां नक्ताशनोभक्त्यौदिक्षु शुद्धबलिं हरेत्"। शुद्धबलिः पवित्रद्रव्यैः पूजोपहारः। "विचित्रैः कुसुमैर्भक्ष्यैः पूजयेच्च द्विजांस्तथा। सर्वा भवत्यः सिध्यन्तु मम जन्मनि जन्मनि। एवमुक्त्वा बलिं तासु दत्त्वा शुद्धेन चेतसा। ततोद्विपन्नं भुञ्जीत दध्यन्नञ्च सुसंस्कृतम्। सर्वं पश्चाद्दयद्येष्टञ्च एवं संवत्सरं नृपः। यः करोति नृपो नित्यं तस्य दिग्विजयो भवेत्"।

सितसप्तमीव्रतं विष्णुधर्मोत्तरे "मार्गशीर्षस्य मासस्य शुक्लपक्षे नराधिप!। सोपवासन्तु सप्तम्यां कमलैः पूजयेद्रविम्। अर्चायां वा स्थले वापि शुक्लैः पुष्पैर्यथाविधि। चन्दनेन तु शुक्लेन वटकैः पूरकेण च"।

सिद्धार्थकादिसप्तमीव्रतं भविष्यपु॰ "वैनतेय! शृणुष्व त्वं विधानं सप्तमीव्रतम्। एतद्धि परमं गुह्यं रवेराराधनं परम्। सिद्धार्थकैस्तु प्रथमा द्वितीया चार्कसम्पुटैः। तृतीया मरिचैः कार्य्या चतुर्थी निम्बसप्तमी। षड्युता पञ्चमी कार्य्या षष्ठी च फलसप्तमी। सप्तम्यनोदना वीर! सप्तमी परिकीर्त्तिता"। षड्युता इति सिद्धार्थकादिषड्भिः प्रकारैर्युता"। इत्येताः सप्तसप्तम्यः कर्त्तव्या भूतिमिच्छता। तथा चानुक्रमेणासाङ्करणं कथयाम्यहम्। माघे वा मार्गशीर्षे वा कार्य्या शुक्ला तु सप्तमी। न च स्यान्नियमभङ्गः पञ्चमासकृतो भवेत्"। आर्त्तिवशादन्यस्मिन् मासे पक्षे च कार्य्येत्यर्थः" इत्यादि।

सिद्धिविनायकचतुर्थीव्रतं स्कन्दपु॰ "गजवक्त्रन्तु शुक्लायां चतुर्थ्यां पूजयेन्नृप!। यदा वोत्पद्यते भक्तिर्मासे पूज्यो गणाधिपः। प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृप!। स्वशक्त्या गणनाथस्य स्वर्णरौप्यां तथाकृतिम्। कृत्वा पूजां प्रयत्नेन स्थाप्य पश्चात्कृतैः पृथक्" इत्यादि।

सुकलत्रप्राप्तिव्रतं विष्णुधर्मोत्तरे "यच्च परिसमासाद्य नारीह सुखमेधते। दुःशीलेऽपि हि कामार्थौ नारी प्राप्नोति भर्त्तरि। अनाहारा जगन्नाथं सर्वलोकेश्वरं हरिम्। कथमाप्नोति चेन्नारी सर्वलोकगुणान्वितम्। सुकलत्रयुतन्तस्माद्व्रतमच्युततुष्टिदम्। कर्त्तव्यं लक्षणं तस्य श्रूयतां वरवर्णिनि!। यच्चीर्त्वा सर्वनारीणां श्रेयः प्राप्नोत्यसंशयम्। ऐहिकञ्च सुखं प्राप्य मृता स्वर्गसुखान्यपि। अनुज्ञाप्य स्वपितरौ मातृतश्च कुमारिका। पूजयेत्तु जगन्नाथं भक्त्या पापहरं हरिम्। त्रिषु स्वरेष्वयत्नेषु पतिकामा कुमारिका। माधवायेति वै नाम जपेन्नित्यमतन्द्रिता। प्रियङ्गुणा रक्तपुष्पैर्मधुकैः कुसुमैस्तथा। समभ्यर्च्याच्युते दद्यात् कुङ्कुमेनानुलेपनम्। सर्वौषधिभिः सुस्नाता तमाराध्य जगत्पतिम्। नमोऽस्तु माधवायेति होमयेन्मधुसर्पिषा। सदैवमुत्तरायोगे समभ्यर्च्य जनार्दनम्। शोभनं पतिमाप्नोति प्रेत्य स्वर्गञ्च गच्छति। अतिबाल्ये च यत्किञ्चित् तया पापमनुष्ठितम्। तस्माद्विमुच्यते पापात् सुखिनी चैव जायते। अब्देनैकेन तन्वङ्गि! व्रतं प्राप्य यदिच्छति। तदेव प्रा-